४६४६

स्नान सूत्र परिशिष्ट भाष्यं स्नानविधि-
कर्ता- अग्निहोत्री हरिहर० सूत्र विवरणाख्य

१८
~~२८ पत्राणि सं. x~~

सूत्र पद्धति०

© Dharmartha Trust J&K. Digitized by eGangotri

कात्यायनीयस्नानविधिसूत्रविवरणम्

षट्पर्द

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri

॥ष्टकर्षणवरदमूर्त्तिर्जयति॥ ॥प्रणतोस्मि हरेरंघ्रिसरसीरुहमादरात्॥
यज्ज्ञगलावनं पाथः प्रासोष्ठामरसैंधवं॥१॥ कात्यायनकृतस्नानविधेर्व्या
ख्यापुरःसरं॥ विधास्येपद्धतिं विद्वत्सदाचारद्विजप्रियं॥२॥ अथातो
नित्यस्नानमिति सूत्रं॥ अथश्रौतस्मार्त्तक्रियानुष्ठानविधानानंतरं॥ यत
स्ताः क्रियाः स्नानपूर्विका एव। अतो हेतोर्नित्यसंध्योपासनपंचमहायज्ञा
दिनित्यक्रियानुष्ठानाधिकारसंपादकत्वेनावश्यकम्॥ तदेवस्नानं बाह ॥१॥
:सर्वांगजलसंयोगशुद्धिः॥ विधास्यनद्धति [illegible]॥ न स्नानं कुत्राविधे
य नित्यपेक्षायामाह॥ नद्यादाविति॥ नदीआदिः प्रथमामुख्या यस्य स्ना

© Dharmartha Trust J&K. Digitized by eGangotri

नाधिकरणस्य देवखाततडागसरोगर्त्तह्रदप्रस्रवणादेरकृत्रिमजलाशयस्य
सन्नद्यादिः तस्मिन्। अकृत्रिमे जलाशये स्नानं कुर्यादिति यावत्॥ तत्र नदीकू
लद्वयांतर्गतयोजनाधिपभूभागप्रवाहजलाल्लोके नदीत्वेन प्रसिद्धा च॥
देवखातो देवनिर्मितत्वेन प्रसिद्धो ब्रह्मह्रदादिः॥ तडागो गदालोलदंडखा
तादिः। सरः पुष्करखातादि। गर्त्तो योजनपर्याप्तभूभागस्थलप्रवाहविशे
षः। ह्रदः अगाधोन्नोध्वो जलराशिरवस्थितः। प्रस्रवणं पर्वतादेः स्रवतः प्रव
तो निर्झरः॥ एवमाद्यकृत्रिमासंभवे पंचमृत्पिंडोद्धरणपूर्वकं कृत्रिमे निज
लाशये स्नायात्॥ पंचपिंडाननुद्धृत्य न स्नायादिति योगिवचनात्॥ एवं स्ना

© Dharmartha Trust J&K. Digitized by eGangotri

नंतदधिकरणं वानुविधायेदानीं स्नानोपकरणाहरणपूर्विकां स्नानेतिकर्त्तव्य
तां विधातुमुपक्रमते ॥ मृद्गोमयकुशतिलसुमनसऽ आहरेदिति ॥ मृदश्च ।
गोमयं च । कुशांश्च । तिलांश्च । सुमनसश्च । मृद्गोमयकुशतिलसुमनसः
५४ आहृत्यानीं स्वयं । शूद्रादन्येन वा हार्या । तत्र मृदं शुचिदेशस्थां शर्करास्मा
दिरहितां आखुलांगलवल्मीकोत्कर्षणपांसु सुकर्दमऽङ्गोमयं अ
रोगिण्यादिगवीशकृत् ॥ कुशान् यवादिशुचिक्षेत्रादिसंभवान् । ति ॥२॥
लान् ग्राम्यानारण्यान्वा । सुमनसः पुष्पाणि सुगंधीन्येव । अगंधिदु
र्गंधिप्रतिषिद्धवर्जितानि शतपत्रादिकानि । बिल्वतुलसीप्रभृति

© Dharmartha Trust J&K. Digitized by eGangotri

पत्राणि च। उदकांतं गत्वा शुचौ देशे स्थापयेत्॥ उदकस्य पूर्वोक्तिनद्यादि
संबंधिनः अंतं समीपं गृहाद्दूरं गत्वा प्राप्य। तत्राप्युपद्रवरहिते प्रक्षालिते
शुचौ देशे शुद्धप्रदेशे। वस्त्राद्यैनरहितायां भूमौ इति यावत्॥ स्थाप्य मृदा
दीनि निधाय। अत्रासमासे पि ल्यप्प्रयोगश्छांदसः। छंदोवत्सूत्राणि
भवंतीति वचनात्॥ प्रक्षाल्य पाणिपादमिति॥ प्रक्षाल्य मृदा जलेन च प्र
कर्षेण क्षालयित्वा। किं पादौ च। पाणी च। पाणिपादं। द्वंद्वश्च प्राणितूर्यसेनां
गानामिति सूत्रेणैकवचनं। अत्र ण्यंतत्वात् प्राण्यङ्गहितत्वाच्च पाणिशब्द
स्य पूर्वनिपातः। तेनादौ दक्षिणपादोपक्रमेण पादौ प्रक्षाल्य तथैव पाणी प्र
क्षालयेन्न पाठक्रमेण॥ कुशोपग्रहो बद्धशिखाक्षरवी यज्ञोपवीत्याचम्येति॥ कु

© Dharmartha Trust J&K. Digitized by eGangotri

स्या। सत्रिग्रन्तयोर्दर्भस्तंबा उपग्रहाः। सव्यहस्तेध्धतायनसकुशोपग्रहाः॥ उपग्र
हः पवित्रमप्युपलक्षयति॥ सव्यः सोपग्रहः कार्यो दक्षिणः सपवित्रक इति
स्मृतेः॥ तेनानंतर्गर्भसाग्रप्रादेशमात्र दर्भदलद्वयात्मकपवित्रालंकृत दक्षि
3 णहस्तः। बहुकुशोपग्रहान्वितसव्यहस्त इति सिद्धं॥ बद्धाशिखा चूडा अ
स्यास्तीति बद्धशिखी। यज्ञोपवीतं ब्रह्मसूत्रमस्यास्तीति यज्ञोपवी
ती। अत्र सदोपवीतिना भाव्यं सदा बद्धशिखेन चेति कात्यायनस्मृतेः ॥३॥
र्बद्धशिखित्वयज्ञोपवीतित्वे प्राप्ते पुनर्विधानं केशाबंधनोत्तरीयवाससो
र्नित्यत्वार्थं। यत्तु प्रेतस्पर्शिनां स्नाने एकवस्त्राः प्राचीनावीतिन इति पारस्क

© Dharmartha Trust J&K. Digitized by eGangotri

गृह्यस्मरणं न तत्स्नानां नरे द्विवस्त्रता शापकं ॥ यतः अशुचिस्पर्शादिनिमि
त्तके स्नाने सवासा जलमाविशेदित्यादिवचनैः एतस्य त्रिमपि स्नानेऽपदाभि
यजुषा आपो जलं अंजलिना करद्वयपुटेनादायोद्धृत्य दुर्मित्रिया स्तस्मै स
न्तु इति यजुषा द्वेष्यं शत्रुं प्रति निषिंचेत् ॥ शत्रुं मनसा ध्यात्वा भूमौ प्रक्षिपे
दित्यर्थः ॥ द्वेष्याभावे कामाद्यरिषड्वर्गं मनसा ध्यात्वा निषिंचेत् ॥ कटिं वस्त्र
रूजंघे चरणौ करौ मृदा त्रिः । त्रिः प्रक्षाल्येति ॥ कटिं नाभेः पृष्ठवंशस्य च
समंतात् तस्याधोभागं वस्तिगुदमेढ्रयोरन्तरालं । वस्तिर्योनिनाभ्योरन्तरालो
देशः । वस्तिर्नाभिरधो द्वयोरित्यमरः ॥ ऊरू वस्तितोऽधस्तात् जानुपर्यंतांगे ।

© Dharmartha Trust J&K. Digitized by eGangotri

५

जंघेजानुनोरधस्ताद्दुकूलस्फपर्यंतो द्विवस्त्र। ताभ्यासो तत्सुनरेकपुनरेकवस्त्रता
पारिसंख्यानार्थं न पुनः श्वेतस्नानव्यतिरिक्तस्नाने द्विवस्त्रज्ञापकं ॥ यतो वक्ष्यति
निष्पीड्य वस्त्रमिति ॥ योगयाज्ञवल्क्योपि निष्पीडनं स्नानवस्त्रं क्षितौ ॥ स्नान
वस्त्रस्यैकत्वं स्मरति ॥ अतः साधूक्तं ॥ यज्ञोपवीतीति पुनर्वचनं उत्तरीयवस्त्रव्यु
दासार्थमिति ॥ तस्मान्नैमित्तिके एव स्नाने नैकवस्त्रता नान्यत्रेति स्थितं ॥ आ
चम्य सूत्रे ॥ अथाग्नास्त्रमापमनं कृत्वा ॥ उरुं हीति तोयमामंत्र्यावर्त्तयेद्धेतेन्नू ॥ ४ ॥
तमिति ॥ उरुं हि राजेति अनया ऋचा तीर्थसलिलमामंत्र्याभिमुखीकृत्य येने
त्यातमित्यनयर्चा तत्तोयं दक्षिणहस्तेन प्रदक्षिणं सकृदावर्त्तयेत् ॥ आलोड

© Dharmartha Trust J&K. Digitized by eGangotri

येत्। सुमित्रियान इत्यपोंजलिना दाय दुर्मित्र्या इति द्वेष्यं प्रति निषिंचेत्॥ सुमित्रि
यान आवरणो गुल्फतो धस्तान्तलमभिव्याप्य पादौ॥ करौ मणिबंधादारभ्यां नखे
ष्वेरंगुल्यग्रावधि मृदा सव्यहस्तगृहीतया नाभेः कटिं सकृदालिंप्य प्रक्षालयेत्॥
प्रक्षालनमत्र सामर्थ्याद् ऽद्भिः सकृत्प्रक्षाल्य तथैवाद्भिः तथैव त्रिः कटिं प्रक्षा
लयित्वा एवमेव त्रिर्वस्तिप्रभृतीनि क्रमेणैकैकत्रयेनोदकेन प्रक्षाल्य॥ आवंम्यनम
स्योदकमालभेदंगानि मृदेदं विष्णुरिति॥ कथ्याद्यधमांग प्रक्षालन संभवाला
पञ्चिविस्य मुख्यार्थमाचमनं कृत्वा नमस्योदकं उदकायनमइत्युदकं नमस्य नत्वा इदं
विष्णुरित्येनर्चा दक्षिणपाणि गृहीतया मृदा मुखमारभ्य नाभिपर्यंतं। सव्यहस्तगृ
हीतया नाभिमारभ्य पादतलपर्यंतमंगानि गात्राण्यालभेत्॥ अनुलिपेत्॥ नमस्ये

© Dharmartha Trust J&K. Digitized by eGangotri

5

ति घ्रां दृसो त्वप्। आलभे क्षितिपस्मै पदं स छंदो वस्त्राणि भवंतीति वचनात्
॥ सूर्याभिमुखो मज्जेदिति। ततः शनैर्जलाशयं प्रविश्य नाभिमात्रे जले स्थित्वा
सूर्यस्याभिमुखः सन् मज्जेत्॥ द्विरप्साजलमावगाहेत्॥ एतत्कात्यायनीयं मतं॥
यत्तु प्रवाहाभिमुखो मज्जेदिति स्मृत्यंतरं तदन्यशाखीयविषयं न तु कात्यायनव
चनं स्थावरजलस्नानविषयं॥ स्मृत्यंतरं प्रवाहस्नानविषयमिति। व्यवस्थापक
नस्यात्। मेवं॥ यतः कात्यायनः स्नानं नद्यादौ इत्युपक्रम्य सूर्याभिमुखो मज्जे
दिति सामान्येनुस्मरति। योगियाज्ञवल्क्योपि। भास्कराभिमुखो मज्जेदिति ॥५॥
। तस्मात्कात्यायनेन योगियाज्ञवल्क्यमतानुवर्तिना वाजसनेयिनां सर्वत्रौ
दकान्यायेस्नाने सूर्याभिमुखत्वं मज्जनप्रकारमाह॥ आपो अस्मानितिस्ना

© Dharmartha Trust J&K. Digitized by eGangotri

वो दिदाभ्य इत्युन्मज्य निमज्योन्मज्याचमेति ॥ आपो अस्मान्मातर इति
मंत्रेण स्नात्वा मज्जित्वो दिदाभ्य इत्युन्मज्य ति मंत्रांते उन्मज्य उत्क्रम्यान
मज्य पुनस्तूष्णीं स्नात्वो न्मज्य तथैवो त्क्रम्य उपस्पृश्य ॥ गोमयेन विलिं
पेन्मानस्तोक इति ॥ इति । मानस्तोक इत्यनया श्वा दक्षिणकर गृहीतेन गो
मयेन मूर्द्धप्रभृति नाभिपर्यंतं । वामहस्तगृहीतेन नाभ्यादिपादपर्यंतं शरीरं
विलिंपेत् ॥ रोद्रमंत्राभिधानादुदकं स्पृशेत् ॥ ततो ऽभिषिंचेदिमम्मेवरुण
ति चतस्रभिर्माप्रुदु त्वमंमुंचं त्ववयन्ध्येति ॥ नीति ॥ ततो गोमयानुलेपनानंत
रमेव दक्षिणचुलुक गृहीतेनोदकेन इमम्मे वरुणेत्येवमादिभिः सूत्रपाठक्र
मेण पाठितै रष्टाभिर्मंत्रैः प्रतिमंत्रं मूर्द्धाभिषिंचेत् ॥ अत्र पाठादेव गोमयानु

© Dharmartha Trust J&K. Digitized by eGangotri

लेपनामंतरमभिषेकेआप्लेततःशरदेनानुलिप्तगात्रस्यैवाभिषेकइतिगम्य
ते॥ अंतरेचेनादिति॥ एतदष्टाभिषेवनमंतेपिभवति॥ सन्निधेरभिषेका
दुत्तरत्रानुष्ठेयस्य पावनस्यांतेपीत्यर्थः॥ निमज्याचम्यदर्भैः पावयेदिति॥
6 निमज्य तूष्णींस्नात्वाचम्यस्नानानंतरं विहितमाचमनं कृत्वा दर्भैः स्त्रिभिः
कुशास्तंबैर्दक्षिणहस्तोपात्तैः आदक्षिण्येन नाभेः ऊर्ध्वं पुनर्नाभिं यावत्स्रा
वयेत्॥ पावनमंत्रानाह। आपोहिष्ठेति तिसृभिः इदमापोहविष्मतीर्देवीरा॥६॥
पहृतिद्वाभ्यामपोदेवादुपदादिवन्मुमुचानोदेवीरपांऊर्मसमपोदेवीः पुनंतु मेति
नवाभिस्त्रिसप्ततिभिर्स्योंकारेण व्याहृतिभिर्गायत्र्या दशवानेतेति॥ आपोहिष्ठे

© Dharmartha Trust J&K. Digitized by eGangotri

स्यादिभिस्त्रिसाप्तिर्मंत्र्यं तैर्मंत्रैः पावयेदित्यन्वयः। किंच। ॐकारेण प्रणवेन व्या
हृतिभिर्भूरित्यादिभिस्तिसृभिः। गायत्र्या च तत्सवितुरित्यनयर्चापि पावयेत्॥
कुत्र। आदौ आपो हि ष्ठेत्यादेः पावनस्यारंभे। तथांते चाविसाप्ति मर्पुनात्वित्य
स्यावसाने च। अंतर्जले अघमर्षणं त्रिरावर्त्तयेदिति। अंतर्जले जलस्य मध्ये
निमग्नोऽघमर्षणं ऋतं च सत्यं चेत्येतत्॥ सूक्तं त्रिः त्रीन् वारानावर्त्तयेत्
। अनुध्यायन् जपेत्। द्रुपदां वा यं गोऽदिति वा त्वं प्राणायामं वा सशिरसमो
मिति वा विष्णोर्वा स्मरणं इति॥ यद्वा द्रुपदादित्यादिकाम्नवम्। आयं गौरि
त्यादिकं वा त्र्यं। प्राणायामं वा। वक्ष्यमाणलक्षणं। कथंभूतं। सशिरसं शि

© Dharmartha Trust J&K. Digitized by eGangotri

रसासह वर्त्तमानं। आपोज्योतिरसोमृतं ब्रह्म भूर्भुवस्वरोमिति। मंत्रः त्रि
रः अनेन त्रिरोमहितो विप्राणां धामो स्तीति गम्यते॥ ॐ मिति वा। अंतर्ज्जले
त्रिरावर्त्तयेदित्यनुषंगः॥ अत्रैतेषांपक्षाणां शक्त्यपेक्षयाविकल्पः उ
त्तमाधिकारिणं प्रत्याह॥ विष्णोर्वास्मरण मिति॥ विष्णोः परमात्मस्वरूपेण स
र्वव्यापकस्य स्मरणं ध्यानं वा कुर्यादिति स्नान विधेः प्रथमकंडिकासूत्रार्थः॥
॥ ॥श्री॥ ॥ ततः किं कुर्यादित्यत आह॥ उत्तीर्य धौते वाससी परिधायेति।
एवमुक्तविमुक्त विधिना स्नात्वा उत्तीर्य जलाद्बहिर्निःक्रम्य। धौते अरजकप्र ॥७॥
क्षालिते सदशे शुष्के अनग्निदग्धे अछिद्रे अस्यूते अस्फुटिते केशाद्यसं
युक्ते अमलिने गैरिकादिरागेणाविकृते कार्प्पसे वाससी अंतरीयोत्तरी

© Dharmartha Trust J&K. Digitized by eGangotri

ये द्वे वस्त्रे परिधाय बद्ध्वा। अत्र यथादेशाचारं परिधानस्य विन्यासविशेषः।
प्रांतद्वयगोपनेन। धौताभावे शाणक्षौमादिककुतपानामन्यतमे। अभ्युक्षिते
द्वितीयवस्त्राभावे तृतीयमुपवीतं। योगपट्टं वा॥ कुशरज्जुं वा। परिधानीयस्यो
त्तरार्द्धं वा। उत्तरीयं कुर्यात्। मृदोदकैः करौ प्रक्षाल्याचम्येति॥ मृदोदकेन वा स्व
पाणी च क्रमेण प्रक्षाल्याचम्य। प्राङ्मुख उदङ्मुखो वोपविश्य कुशपवित्रोप
ग्रहस्तपाणिर्ब्रह्मतीर्थेन त्रिरप आचम्य सोदकेनांगुष्ठमूलेन द्विर्मुखं प्रमृज्य
सर्वांगुलीभिरोष्ठौ स्पृष्ट्वा तर्ज्जन्यंगुष्ठाभ्यां दक्षिणोत्तरे नासारंध्रे। अनामि
कांगुष्ठाभ्यां दक्षिणोत्तरे अक्षिणी। ताभ्यामेव पुनर्द्दक्षिणोत्तरौ कर्णौ। कनिष्ठां
गुष्ठाभ्यां नाभिं। पाणितले हृदयं। कराग्रेण मूर्द्धानं दक्षिणोत्तरभुजामूले वो

© Dharmartha Trust J&K. Digitized by eGangotri

पस्पृश्नोत् ॥ एवं द्विराचमनं विधाय शिखाबन्धं परिधाय गंगातीर्थमृत्तिकयोर्ध्व
पुंड्रं ललाटे तिलकं कुर्यात् । त्रिरायम्यासूनिति ॥ त्रिः । त्रिवारान् । असून् ।
प्राणानायम्य संनिरुध्य । प्राणनियमनप्रकारः । गायत्रीं शिरसा सार्द्धं ज
पेद्व्याहृतिपूर्विकां । प्रतिप्रणवसंयुक्तां त्रिरयं प्राणसंयम इति । योगीश्वरोक्तो
8 द्रष्टव्यः ॥ पुष्पाण्यंबुमिश्राण्यूर्द्ध्वं क्षिपेदिति ॥ शौनकः ॥ उभौ पादौ समौ कृत्वा
पूरयेदुदकांजलीन् । गोशृंगमूर्द्ध्वमुद्धृत्य जलमध्ये जलं क्षिपेत् ॥ पक्षांतरं
॥ दृष्टत्वमत्रः प्रभाते स्यान्मध्याह्ने ऋजुसंस्थितः । द्विजोर्ध्वं प्रक्षिपेद्योम सायं ॥ ८ ॥
न्नुपविश्य भुवि ॥ प्रातर्मध्याह्निकीं संध्यां तिष्ठन्नेव समापयेत् ॥ उपविश्य तु साया
ह्ने जले स्वर्घं न निक्षिपेत् ॥ पुष्पाणि कुसुमानि तदलाभे बिल्वादिपत्राणि अंबुनो

दकेनामिश्राणि संयुक्तानि अंजलिनादायोत्थायोर्द्धमुपरि सूर्याभिमुखं क्षि
प्त्वोत्सृज्य प्रणवव्याहृतिपूर्विकाया गायत्र्या। उर्ध्वबाहुः सूर्यमुदीक्षन्नुद्वय
मुदुत्यं चित्रं तच्चक्षुर्गायत्र्याश्च यथाशक्ति विभ्राडित्यनुवाकं पुरुषसूक्तं शि
वसंकल्पं मंडलब्राह्मणेरित्युपस्थाय प्रदक्षिणीकृत्य नमस्कृत्योपविशेदि
ति॥ उर्ध्वौ सूर्याभिमुखौ बाहू यस्य स उर्ध्वबाहुस्तथासन् सूर्यमादित्यं उदी
क्षन् उर्ध्वदृन्नपेक्षमाणः। उद्वयमित्यादिनोक्ताभिश्चतसृभिर्ऋग्भिस्तथा गा
यत्र्याश्च यथाशक्ति सहस्रादिसंख्यया आवृत्तया विभ्राडित्यादिनानुवाकेन पु
रुषसूक्तेन सहस्रशीर्षेत्यादि षोडशर्चेन शिवसंकल्पेन यज्जाग्रत इत्यादिना

© Dharmartha Trust J&K. Digitized by eGangotri

षड्वेन मंडलब्राह्मणेन यदेतन्मंडलं तपतीत्यादिनोपस्थाय सूर्यं स्तुत्वा। तमेव
प्रदक्षिणीकृत्य प्रदक्षिणमावृत्य नमस्कृत्य च कायवाङ्मनोभिः प्रणम्य उपवि
श्येत्। आसीत। एवं चिरायमभ्यासनिष्ठा रत्योपविश्येत्। इति सूत्रसंदर्भेण का
9 त्यायनाचार्येण संध्योपासनमुक्तं तत्काण्वमाध्यंदिनानां स्वगृह्योक्तत्वात्सा
नुष्ठानसिद्धिकरं। यत्पुनः शाखांतराधिकरणन्यायेनेदमेव कल्पतरुकारप्रभृ
तिभिर्निबंधकारैराह्निकपद्धतिकारैश्च समस्तशाखांतरोक्तसंध्योपासनविधिसमु॥१॥
च्चितं लिखितं। तत्सर्ववेदशाखाध्येतृसाधारणत्वं सर्वशाखिनामनुष्ठातुमुचि
तं। तच्च प्रयोगवक्ष्ये तेन एवं संध्यावंदनानंतरं किं कुर्यादित्यपेक्षायां ब्रह्मयज्ञं सप्र

© Dharmartha Trust J&K. Digitized by eGangotri

कारमाह। दर्भेषु दर्भपाणिः स्वाध्यायं वक्ष्यमाणमध्यायादावारभ्य वेदमिति॥ दर्भेषु
प्रशस्तदारुनिर्मितासनोपरि आहितेषु प्रागग्रेषूदगग्रेषु वा त्रिषु कुशेष्वासीनः
प्राङ्मुखोदङ्मुखो वा दर्भपाणिः दर्भाः पवित्रोपग्रहव्याधारक्ताः पाण्योर्य
स्यासौ दर्भपाणिः। स्वाध्यायं ब्रह्मयज्ञं च पुनः यथाशक्ति शक्तिमनतिक्रम्य
कुर्यात्। किं कृत्वा। आरभ्य उपक्रम्य कं वेदं मंत्रब्राह्मणात्मकं। कुत आरभ्य आ
दौ आदितः इषे त्वोर्जे त्वेत्यस्मात्। व्रतमुपेष्यं नित्यस्माच्च। अत्र वेदमित्येक
वचनात्। अनेकवेदाध्यायिनोपि एकं वेदमारभ्य प्रतिदिनं तमेवोपर्युपर्यध्य
यनेन समाप्यान्यवेदमारभ्य तथैव संपादयेदपुराणे ॥। हासादीनत्रिनघेवाद्विमार
तआरभ्यैकैकं समाप्यापरमपरमारभ्य समापयेत्। न पुनर्यदृच्छया एकः दे

© Dharmartha Trust J&K. Digitized by eGangotri

स्वामेकदेशमादावारभ्येति नियमात्। वेदशब्दोऽत्रान्योपलक्षणार्थः। यथा
ह याज्ञवल्क्यः। वेदाथर्वपुराणानि सेतिहासानि शक्तितः। जपयज्ञप्रसिध्य
र्थं विद्यां चाध्यात्मिकीं जपेदिति। स चायं जपयज्ञः। कालांतरे विस्मर्यते। यश्च
श्रुतिजपः प्रोक्तो ब्रह्मयज्ञस्तु संस्मृतः॥ स चार्वाग्तर्पणात्कार्यः। पश्चाद्वात्रा
नरात्कृतेः वैश्वदेवावसाने वा नान्यत्र वर्त्ते निमित्तकादिति छंदोगपरिशिष्टे॥ ॥
॥ इति द्वितीयकंडिका सूत्रार्थः॥ ॥ एवं कृतब्रह्मयज्ञः किं कुर्यादित्यत आ
ह॥ तर्पयित्सूर्वं ब्रह्माणं पूर्वमित्यादि। तर्पयेत् प्रीणयेत्। कं ब्रह्माणं कथं पूर्वं ॥१०॥
आदौ केषां विष्णुमित्यादि भूतग्रामांतानां देवानां। अत्र तर्पयेद् ब्रह्माणमिति
तर्पणक्रियायाः कर्मीभूतान् ब्रह्मादीनुद्दिश्य तेनाद्वितीयया विधायभूतग्रा

© Dharmartha Trust J&K. Digitized by eGangotri

मस्य चतुर्विधस्तर्पणानामिति प्रथमप्रयोगमाचार्योदर्शयितियतस्तत्तस्य
ब्रह्मलोकं तर्पणामित्येवमेवं तर्पणि प्रयोगः ततोनिवीतिमनुष्यानिति ततोदे
वतर्पणानंतरंनीवीतिः। पूर्व x कं ठसंसक्त ब्रह्मसूत्रः सनूमनुष्यानूद्दिश्या
क्षानवानूतर्पयेदिति। पूर्वोक्ताख्याते नानुषंगः। कृतेमनुष्यादृत्यपेक्षा
यामाह। सनकं चेत्यादिश्लोकोक्तानूसप्त। ततोपसव्यं तिलमिश्रमिति॥
ततोमनुष्यतर्पणानंतरं अपसव्यं प्राचीनावीतिकं कृत्वा। तिलमिश्रं तिलैः
संयुक्तजलं गृहीत्वा तर्पयेदितिसंबंधः कांस्तर्पयेदित्यपेक्षायामाह॥ कु
व्यवाडनल कमित्यादि॥ कव्यवाडनल मित्यादिनाबर्हिषदोपिवेत्यंतेनसूत्रे

© Dharmartha Trust J&K. Digitized by eGangotri

णपठितान्। तत्र कव्यं पितृभ्यो वहतीति कव्यवाट्। अनलोग्निः कव्यवाट्। वासा
वनलश्चेति कव्यवाडनलौ स्तः। अत्र केचित् कव्यवाहं अनलं चेति द्वे देवते मन्यन्ते तत
दयुक्तं। हव्यवाहनो वै देवानां कव्यवाहनः पितॄणामिति श्रुतेः॥ कव्यवाडुत्तगुण
विशिष्टोनलः पितृगणान्तर्गत इति। कव्यवाडनलः एकैव देवता यमांश्चैके इति।
एके आचार्या यमांश्च तर्पयितव्याहुः। तानाह॥ यमाय धर्मराजाय मृत्यवे वैवस्वतका
यवेत्येवमादिनोक्तान्। पितृतर्पणांजलिसंख्यामाह॥ एकैकस्य प्रत्येकं कव्यवाड॥१६॥
नलादि। तिलैः कृष्णैः मिश्रान् संयुक्तान् त्रीन्स्त्रीन् त्रित्वसंख्योपेतनान्।
जलान् जलीन् जलेन पूर्णान् अंजलीन्। अस्य तर्पणस्य नित्यत्वेप्यानुषंगिकं फ

© Dharmartha Trust J&K. Digitized by eGangotri

लमाह। यावज्जीवमित्यादि। जन्मत आरभ्य यावत्तर्पणादिनं तावत्कृतमाचरि
तं पापमशुभं कर्म तत्क्षणादेव तर्पणानंतरमेव नश्यति। क्षीयते। जीवत्पितृको
प्येतानन्वारब्धेनरद्इति। जीवो विद्यमानः पिता जनको यस्य सोप्येतान् पूर्वोक्ता
न् ब्रह्मादिचित्रगुप्तान्तान् तर्पयेदिति। गतेन संबंधः। जीवत्पितृकोप्येतानि
तिवदता सूत्रकारेणेनसूत्रेन ब्रह्मादिचित्रगुप्ताः परिसंख्याताः। तेन जी
वत्पितृक एतानेव तर्पयेत्। न त्वन्यान्तान् पितृव्यमातामहादीन एवार्थे अ
पि। अन्वारब्धेनरद्इति प्रमीतपितृकस्यैवान्यतर्पणविधानात्। यत्तु स्मृत्यंत
रं। येभ्य एव पिता दद्यात्तेभ्यो दद्यात्स्वयमिति। न सान्ति न सन्यासी जीवत्पि

© Dharmartha Trust J&K. Digitized by eGangotri

तृकविषयं ॥ ब्राह्मणादिषु द्विजोऽपस्मरणात् । इतरो जीवपितृकादन्यो मृतपितृकः सो
न्यान् एतेभ्योऽपरान् पित्रादीन् स्त्रीन् स्त्रीन् । एकारादेतान् ब्रह्मादि विचित्रगुप्तान् तांश्च
तर्पयेदिति संबंधः । तर्पणवाक्यानि प्रयोगे वक्ष्यंते । तत्र पितृपितामहप्रपितामहांस्तर्प
इत्वा ग्रसेकारव्यं कर्म कुर्यादित्याह ॥ उदीरतामंगिरस आयंतु न ऊर्जं पितृभ्यो ये चेह
12 मधुवाता इति त्र्यृचं जपन् प्रसिंचेदिति । उदीरतामित्यादि प्रतीकोक्ताः षड् ऋचः । मधु
वाता इति त्र्यृचं चैवैनयोर्वा जपन् उपांशु आम्नायस्वरेण पठन् प्रसिंचेत् ॥ अंजलिस्थाः
आपः पितृतीर्थेन तर्पणजलाधिकरणे प्रक्षिपेत् । तत्पश्चमिति प्रतिसेकमुक्ताभिः ॥१२॥
प्रसिंचेत् ॥ अत्र केचिदुदीरतामित्यादिकानां ऋचां पित्रादितर्पणां अंजलिदाने करण
त्वमन्यंते । तदसमंजसं सूत्रार्थपर्यालोचनेन करणत्वेनाप्रतीतेः । कथं जपं प्रसिंचेदित्य

© Dharmartha Trust J&K. Digitized by eGangotri

त्रजपंभितित्रांत्वप्रत्ययेनमंत्रान्जपनासनंतंजलप्रसेकः कार्यइतिसूत्रान्प्रतीय
ते। करणलेतुमंत्रांतैः कर्मादिः सांनिपात्यइतिपरिभाषायांमंत्रेसमाप्तेंजलिर्देयः
तथाजपतीतिजपशब्दस्यशात्वप्रत्ययस्यचानर्थक्यप्रसंगः। प्रसेकशब्दस्यदानार्थता
कल्पनाच। तस्मात्प्रसेकाख्यमिदंकर्मानंतरंतथाचयोगियाज्ञवल्क्यः। पितृंन्ध्या
यन्प्रासिंवेदंजपन्मात्रान्यथाक्रममिति। नमोवइत्युक्त्वामातामहानांचैवंगुरुस्त्री
ब्यर्तिसिखावांधवानिति। नमोवः पितरोरसायेत्यादीन्यष्टौयजूंष्युक्त्वापाठत्वा
मातामण्हानांमातुः पितृपितामहप्रपितामहानांचैवंएकैकस्यातिलमिश्रांजलि
त्रयेणतर्पणंइत्वागुर्वादीनप्येवमेकैकांजलिनातर्पयित्। अत्रगुरुमाचार्यंउपनय

© Dharmartha Trust J&K. Digitized by eGangotri

नपूर्वकवेदाध्यापकमित्यर्थः। श्रोत्रियं विद्याध्ययनार्थं गुरुकुलवासिनं। ऋत्विजो
याजकान् ज्ञातीन् पितृव्यभ्रात्रादिसपिंडसगोत्रान् बांधवान् मातुलपि
तृष्वसृमातृष्वसृतदपत्यानि च तर्पयेत् इत्यनुवर्त्तते। अतर्पिताद्देहाद्रुधि
रं पिबंतीति। यत एते पूर्वोक्ता ब्रह्माद्यो ऽतर्पिताः संतो देहादतर्पयितुः शा
13 रीराद्रुधिरं पिबंति। तर्पणाकरणजप्रत्यवायतो देहस्य रुधिरशोषो भव
तीत्यर्थः। एतदनिष्टापत्तिवचनं तर्पणस्यावश्यकरणीयत्वज्ञापनार्थं। नि॰ ॥१३॥
पीड्य वस्त्रमाचम्येति। वस्त्रं स्नानवसनं भूमौ निः पीड्य पीडयित्वा आच
म्य पूर्ववत्। एवं तर्पणं विधाय तदंते स्थलवासो निष्पीड्याचामेत्। नि॰ पी

© Dharmartha Trust J&K. Digitized by eGangotri

ड्येत्स्नानवस्त्रं तिलमिश्रसमन्वितं। नपूर्वंतर्पणाद्वस्त्रं नैवांभसिनपादयोः॥ व
हलाराग्रादः। निःपीडयतियः पूर्वंस्नानवस्त्रमतर्पिते॥ निराशाः पितरस्तस्यां
तिशापंदत्वासुदारुणं। द्वादश्यांपंचदश्यांचसंक्रांतौश्राद्धवासरे। वस्त्रंनि
ष्पीडयेन्नैवनचक्षारेणयोजयेत्। एवंतुतर्पणंप्रातःस्नानानंतरंप्रातःकार्यं।
तदानकृतंचेत्मध्याह्नस्नानानंतरंकार्यं। मध्याह्नेमंत्रस्नानंकृतंचेत्। तदा
परान्हादिषुस्नानंकृत्वाकुर्यात्। पूर्वाह्णोवैदेवानांमध्यंदिनोमनुष्याणांमप
राह्णः पितृणामितिश्रुतितस्तर्पणव्यतिरिक्तविषया। प्रातश्चेवंकृतंतर्पणं
मध्याह्नादिषुनकर्त्तव्यमेव। स्नानांगतर्पणंतुवैधस्नानानंतरंकार्यं। ततोदे
वतापूजामाह॥ ब्राह्मवैष्णवरौद्रसावित्रमैत्रवारुणैस्तल्लिंगैरर्चयेदिति॥

© Dharmartha Trust J&K. Digitized by eGangotri

ब्राह्मस्य वैष्णवस्य रौद्रस्य सावित्रस्य मैत्रस्य वारुणस्य। ब्रह्मवैष्णवरौद्रसावित्रमै
त्रावरुणास्तैः ह्रुता। कीदृशैः तल्लिंगैः तेषां ब्रह्मादीनां लिंगानि प्रकाशनस
मर्थानि पदानि येषु ते तल्लिंगास्तैः। अत्र तु ब्राह्मेत्यादि देवतानां द्वितेन तल्लिंग
त्वे प्राप्ते पुनस्तल्लिंगैरिति किमुच्यते। श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्याभि
14 मंत्राद्यंगविनियोगो भवति सर्वत्र। अत्र तु लिंगमेव विनियोजकं ग्राह्यम् इत्यर्थः
। तल्लिंगैरिति मंत्रैरर्चयित्वा। ब्रह्माविष्णुरुद्रसवितृमित्रावरुणानावाहनाद्युपचा
रैः पृथक् पृथक् पूजयेदिति यावत्। अदृश्रं हंस इत्युपस्थायादित्यं प्रदक्षि ॥२४॥
णीकृत्य दिशाश्च देवताश्च नमस्कृत्योपविश्य ब्रह्माग्नि पृथिव्योषधिवाग्वाचस्प
ति विष्णु महेन्द्रोऽद्भ्यो पांपतये वरुणाय नम इति सर्वत्र संवर्चसेति मुखं विमृष्टे

© Dharmartha Trust J&K. Digitized by eGangotri

देवा गातुविद इति विसर्जयेदिति ॥ अदृष्टमस्यकेतवइति हंसः शुचिषदित्येता भ्यां मं ॰ या भ्यामादित्यं भगवंतं विवस्वंतमुपस्थाय स्तुत्वा । प्रदक्षिणी कृत्य प्रदक्षि णीमावर्त्तयदिशः प्राच्याद्याः । देवताश्च सान्निध्यादिष्टामधिष्ठात्री श्चैन्द्राद्या नमस्कु र्यमंत्राणामनभिधानान्नाममंत्रैर्नमोयोगाच्चतुर्थ्यंतैः प्रणम्योपविश्य आसिताब्र ह्मादिदेवरूणां ते भ्यश्च देवेभ्यो नमस्कृत्य । योगियाज्ञवल्क्यवचनादुदकादानमाह नं । संवर्त्तसिति मंत्रेणांजली नू आदाय मुखमास्यै धिमच्छेत्संयोधयाति । देवागातुवि इति मंत्रेण स्नानादि कर्मांगभूता देवता विसर्जयेत् । एष स्नानविधिरेष स्नानवि धिरिति । अत्राचार्यो माध्याह्निक क्रियांगभूत स्नाने ति कर्त्तव्यतामभिधाय दानी मेषस्नानविधिरिति अनेनस्नानांतरेपि मलापकर्षणाशुचिस्पर्शनादिनैमित्तिक

© Dharmartha Trust J&K. Digitized by eGangotri

स्नानव्यतिरिक्ते स्नाने एष एवाविधिरितिकर्त्तव्येत्यतिदिशति। स यन्नद्या
दौ जलाशय एव। यथाह कात्यायनः छंदोगपरिशिष्टे। यथाहनि तथा प्रातर्नित्यं
स्नायादनातुरः। दंतान्प्रक्षाल्य नद्यादौ गेहे चेत्तदमंत्रवदिति। अत्र मध्याह्न
स्नानविधिं प्रातःस्नाने तिदिशन् नद्यादौ नियम इति। गेहे चेत्तदमंत्रवदि
15 ति जलाशयादन्यत्र स्नाने मंत्रनिवृत्तिं प्रतिपादयति। अतो यदि गृहे उद्धृतजले
न स्नानेनोष्णेन वा स्नाति तदा न कश्चिद्विधिः। अमंत्रवदिति वचनात्। मंत्रोस्या
स्तीति मंत्रवत्। मंत्रसहितं। न मंत्रवदमंत्रवत्। अथवा अमंत्रो मंत्राभावः। शूद्रः ॥१५॥
स तथा तूष्णीं स्नाति। न हृत्स्नायादित्यर्थः। तद्यथा शुचौ देशे उपविष्टः पादौ क
रौ च मृज्जलैः प्रक्षाल्य कुशपवित्रोपग्रह आचम्यादित्यादिभिः मुखस्नानादि

© Dharmartha Trust J&K. Digitized by eGangotri

शस्तपात्रस्थंप्रशस्तं जलं गंगातीर्थजलबुध्या दायन्नरः प्रभृतिबहिः सर्वां
गेषुस्नायात्। आवश्यकसंध्योपासनाग्निहोत्रादिकर्मानुष्ठानाधिकारार्थमि
तत्। यतः स्मरति। स्नानोधिकारी भवति दैवे पित्र्येच कर्मणि पवित्राणां ज्याप्येदा
नेच विधिचोदित इति। इदं वारुणस्नानं मुख्यं (०) १ अस्यासंभवे प्रशस्तभस्मना
सर्वांगोद्धूलनमाग्नेयं। २। गवां खुरोत्खातरजसां शरीरेण ग्रहणं वायव्यं ३। आपो
हिष्ठादित्रिभिः ईपुदादिवशन्नो देवीरिदमापः प्रवहतेति वा लिंगैर्मन्त्रैः प्रतिमंत्रं
कुशाग्रेण मूर्द्धि जलाभिषेको मंत्रं ४। आर्द्रवाससा भूरीरमार्जनं कापिलं ५ आ
पो हिष्ठेति ब्राह्मणं ६ सम्यद्दालंभनं पार्थिवं ७ अद्भिरातपवृष्ट्यादिव्यं ८ सच्चिदा
नंदघनात्मकजगत्कारणविश्वव्यापकवासुदेवानुस्मरणं मानसं ९ दक्षिणावर्त

© Dharmartha Trust J&K. Digitized by eGangotri

शंखेन ताम्रपात्रगतोदकस्य शिरसा प्रतिग्रहो विष्णुप्रतिमा शालग्रामशिला
स्नानोदकेन वा शिरोभिषेचनं वैष्णवं १० तद्दृष्टादृष्टफलमपराकोक्तेः। एतेषां
स्नानानुकल्पनामन्यतमेन नित्यकर्मानुष्ठानाधिकारसंपत्तये शुद्धो देशे उप
विश्य मृदंभोभिः पादौ पाणी च प्रक्षाल्य कुशोपग्रहः पवित्रपाणिराचम्य सूर्या
16 भिमुखः स्नायात्। एते च स्नानानुकल्पाः सर्ववर्णाश्रमाणां सर्ववेदशाखा
ध्यायिनां च मंत्रस्नानमृते साधारणाः। प्रातःस्नानं नित्यं। चांडालशवकूप
रजस्वलादीन् स्पृष्ट्वा स्नानार्हः स्नाति तन्नैमित्तिकं। दैवज्ञाद्युपदिष्टपु ॥१६॥
ष्यस्नानादिकं काम्यं। जपयज्ञदेवपितृयजनार्थं नद्यादितीर्थेषु च क्रियांगं।
अभ्यंगपूर्वं मलापकर्षणं। देवखातादितीर्थेषु क्रियास्नानं। एष कात्यायनोक्तः

© Dharmartha Trust J&K. Digitized by eGangotri

ते। ततः साग्निकः प्रातःकाले पादप्रक्षालनादि गोमयविलेपनान्तं विधाय। मुंच
तु मेत्या स्नानमभिषिच्य निमज्याचम्य दर्भैः प्रणवव्याहृतिगायत्रिभिः प्रतिमं
त्रैं पावयित्वा। मुच्यं तु मेति पुनराभिषिंच्यां तर्ज्जलेघमर्षादीनामन्यतमं समाव
र्त्यचम्याग्निं गच्छेत्। निरग्निकस्तु सूत्रोक्तं सर्वमनुतिष्ठेत्। अनुदितहुतिसंको
चनिमित्तस्य होमस्याभावात्। अदिनः शिरोरोगिणश्च अकंठमज्जनं स्नानं। स
मर्त्तृकयोषितां च। ग्रहणादिनिमित्तं संक्रांत्यादिपर्वनिमित्तं गंगातीर्थेवफल ॥२७॥
प्रदं जप्यादीनामपि सशिरस्कमेव। स्त्रीशूद्राणां सर्वत्र तूष्णीं। यथाह याज्ञवल्क्यः
॥ ब्राह्मणक्षत्र ब क्षत्रियविशां स्नानं मंत्रवदिष्यते। तूष्णीमेव तु शूद्रस्य सनम

© Dharmartha Trust J&K. Digitized by eGangotri

स्नानविधिः काण्वमाध्यंदिनानां नियतः । इतरेषां त्वनुक्तविधिविशेषाणां वा
जसनेयिनां च । बह्वृचादीनां त्वनुक्तस्नानविधिविशेषाणां मत्स्यपुराणादिविहित
स्नानविधिना विकल्पो बोद्धव्यः । एवं च सति यथोक्तविधिस्नानमालस्यादिनाऽकु
र्वतां न कर्माधिकारः । न च फलवतः क्रियास्नानादेः फलावाप्तिः प्रत्युत विहिताक
रणात् प्रत्यवायसंभवो गृहस्थस्य वनिनश्च । यतेस्तु तद्धर्मविधौ द्रष्टव्यः । ब्रह्मचारि
णो याज्ञवल्क्येनोक्तो यथा स्नानमब्दैवतैर्मंत्रैर्मार्जनं प्राणसंयम इति । अत्रैणस्ना
नाविधिरिति वचनात् । यथाह मितथासानारीति वचनाच्चयातः स्नानेप्यस्य विधेः
प्राप्तो छंदोगपरिशिष्टे विशेष उक्तः । अल्पत्वाद्धोमकालस्य महत्त्वात्स्नानकर्म
णः । प्रातर्न तनुयात्स्नानं होमलोपो विगर्हित इति । होमशब्देन होमकालो लक्ष्य

© Dharmartha Trust J&K. Digitized by eGangotri

स्कारकैस्समतं ॥ बौधायनोपि । अंभोवगाहनं स्नानं विहितं सर्ववर्णिके ॥ मंत्रवत्प्रो
क्षणं चापि द्विजातीनां विशिष्यत इति ॥ ॥ इत्यग्निहोत्रहरिहरविरचिते कात्या
यनोक्तस्नानविधिसूत्रविवरणं समाप्तं ॥ ॥ ॥ श्रीकाशिदेवतायन
मः ॥ ॥ बह्वल्पं वा स्वगृह्योक्तं यस्य यावत्प्रकीर्तितं ॥ तस्य तावति शास्त्रार्थे
कृते सर्वः कृतो भवेत् ॥ ॥ श्रीवैद्यनाथाय नमः ॥ ॥ चंद्रचूडदेवाय नमः ॥ ॥ ॥१८॥

साकेतलोकनाथः पथि तनुगुणगतो लोक सीमा तत्कीर्तिः श्रीरामः सो तयारंभो [illegible] मुनि [illegible]
कैदोहमूर्तिः ॥ [illegible] निर्लिप्त रौ निरवधि [illegible] नित्यमाया निरासी माया [illegible] सारी [illegible]
सदा [illegible] देवो [illegible] ॥ [illegible] दुष्कान्वितोपि [illegible] नितो [illegible] नीति [illegible] वाद
देशि [illegible] ॥ दुष्टानां मतिपाप भावित [illegible] संगं सदा [illegible] परिमावितो
[illegible] तितसाम्ये [illegible] स्फुटं ॥ २८ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

धर्म० कान्यादन स्नानविधि गजेन्द्र

३५०-

© Dharmartha Trust J&K. Digitized by eGangotri